STOTRADHWANI

## सुन्दरकाण्ड पञ्चचत्वारिंशः सर्गः (४५) - ॥ मन्त्रिपुत्रवधः ॥

ततस्ते राक्षसेन्द्रेण चोदिता मन्त्रिणां सुताः ।
निर्ययुर् भवनात्  तस्मात् सप्त सप्तार्चि वर्चसः ॥ १ ॥

महाबल परीवारा धनुष्मन्तो महाबलाः ।
कृतास् त्रास्त्र विदां श्रेष्ठाः परस्पर जयैषिणः ॥ २ ॥

हेमजाल परिक्षिप्तैर् ध्वजवद्भिः पताकिभिः ।
तोयदस्वन निर्घोषैर् वाजि युक्तैर् महारथैः ॥ ३ ॥

तप्त काञ्चन चित्राणि चापान् यमित विक्रमाः ।
विस्फारयन्तः संहृष्टास् तटित्वन्त इवाम्बुदाः ॥ ४ ॥

जनन्यस्तु ततस्तेषां विदित्वा किङ्करान् हतान् ।
बभूवुः शोक सम्भ्रान्ताः सबान्धव सुहृज् जनाः ॥ ५ ॥

ते परस्पर सङ्घर्षात् तप्त काञ्चन भूषणाः ।
अभिपेतुर् हनूमन्तं तोरणस्थ मवस्थितम् ॥ ६ ॥

सृजन्तो बाण वृष्टिं ते रथ गर्जित निःस्वनाः ।
वृष्टिमन्त इवाम्भोदा विचेरुर् नैर्ऋताम्बुदाः ॥ ७ ॥

अवकीर्णस् ततस् ताभिर् हनुमान् शर वृष्टिभिः ।
अभवत् संवृताकारः शैलराडिव वृष्टिभिः ॥ ८ ॥

स शरान् मोघयामास तेषा माशुचरः कपिः ।
रथवेगं च वीराणां विचरन् विमलेऽम्बरे ॥ ९ ॥

स तैः क्रीडन् धनुष्मद्भिर् व्योम्नि वीरः प्रकाशते ।
धनुष्मद्भिर् यथा मेघै र्मारुतः प्रभुरम्बरे ॥ १० ॥

स कृत्वा निनदं घोरं त्रासयंस्तां महाचमूम् ।
चकार हनुमान् वेगं तेषु रक्षःसु वीर्यवान् ॥ ११ ॥

तलेनाभ्यहनत् काश्चि  पादैः कांश्चित्परन्तपः ।
मुष्टिना भ्यहनत् काश्चिन् नखैः कांश्चिद् व्यदारयत् ॥ १२ ॥

प्रम माथोरसा कांश्चि दूरुभ्या मपरान् कपिः ।
केचित् तस्य निनादेन तत्रैव पतिता भुवि ॥ १३ ॥

ततस् तेष्वव सन्नेषु भूमौ निपतितेषु च ।
तत् सैन्य मगमत् सर्वं दिशो दश भयार्दितम् ॥ १४ ॥

विनेदुर् विस्वरं नागा निपेतुर् भुवि वाजिनः ।
भग्न नीडध्वजच् छत्रैर् भूश्च कीर्णाऽभवद् रथैः ॥ १५ ॥

स्रवता रुधिरेणाथ स्रवन्त्यो दर्शिताः पथि ।
विविधैश्च स्वरैर् लङ्का ननाद विकृतं तदा ॥ १६ ॥

स तान्प्रवृद्धान् विनिहत्य राक्षसान्
महाबलश्  चण्ड पराक्रमः कपिः ।
युयुत्सु रन्यैः पुनरेव राक्षसैः
तदेव वीरोभि जगाम तोरणम् ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥